अतएव कामनाविषयः स्वगत एव स्वर्गः फलं यागादेः, स्वर्गपूतत्वादेश्च पितृपुत्रगतत्वेन काम्यत्वमिति श्राद्धजातेष्ट्यादेः पितृपुत्रगतमेव फलम् एवञ्च मातापित्रादिगतस्वर्गकामनया पुत्रादिना कृतं पुष्करिणीमहादानादिकं पित्रादिस्वर्गजनकमेव कामनाविषयस्वर्गसाधनत्वेन तेषां श्रुतत्वात् न हि स्वगतस्वर्गकामस्य कर्त्तव्यतां पुष्करिण्यादेर्विधिर्बोधयति किन्तु स्वर्गकामस्य स्वर्गः स्वगतः परगतो वेति स्वर्गकामत्वमविशिष्टम्। यजेतेत्यात्मनेपदमपि कर्त्रभिप्रेतक्रियाफलमात्रजनकत्वे। न च स्वर्गकामोयजेतेत्यादौ स्वगतस्वर्गकामनाया अन्तरङ्गत्वादौत्सर्गिकत्वाच्च स्वर्गकामत्वेन स्वगतस्वर्गकाम एवोच्यते। सामान्ये बाधकं विना विशेषपरत्वे मानाभावात्। केचित्तु सम्यग्गृहस्थाश्रमपरिपालनस्य ब्रह्मलोकावाप्तिः फलं श्रूयते इति जातेष्टिपितृयज्ञयोरपि गृहस्थकर्म्मत्वेन तदेव फलमिति फलस्य कर्त्तृगामित्वे नियमएव प्रातिस्विकफलाभिप्रायेणोत्सर्गः इत्याहुः ननु यावन्नित्यपरिपालनस्य तत् फलं न तु काम्यश्राद्धादेः काम्यान्तर्भावे मानाभावात् यावत्काम्यानुष्ठानाशक्तेश्च, यावच्छक्यानुष्ठानस्यापि नान्तर्भावः कामनाविरहादिनाप्यकरणात् यावन्नित्यानुष्ठाने तत्फलाभावप्रसङ्गान्नित्यस्यैवावश्यकत्वेनोपस्थित्यान्वयाच्च। अपि च तैः कर्म्मभिः प्रत्येकमुत्पन्नपूर्व्वं तैश्च परमापूर्व्वं जन्यत इति” न गौरवान्मानाभावाच्च किन्त्वन्तिमक्रियया परिपालनरूपक्रियान्तरेण वेति न सर्व्वं कर्म्म ब्रह्मलोकावाप्तिफलकमिति” मैवं भगवदुद्देशेन कृतस्य नित्यस्य यस्य कस्यापि पालनात् ब्रह्मलोकप्राप्तिः फलं श्रूयत इति जातेष्टिपितृयज्ञयोरपि तथा कृतयोस्तदेव फलं तथा च श्रीभगवद्गीता ‘यज्ञायाचरतः कर्म्म कर्म्मग्रन्थिर्निलीयते यज्ञार्थात् कर्म्मणोऽन्यत्र लोकोऽयं कर्म्मबन्धन” इति तच्च कर्म्म यज्ञार्थतया प्रत्येकमेव तत्फलसमर्थं फलसम्बन्धे, संवलनन्तु मङ्गलवदुपयुज्यते अन्यथैकप्रयोगस्य व्यवधानादसम्भवः। परिपालनन्तु कर्त्तव्यमित्येव करणं तदुक्तं “ददामि देयमित्येव यजे यष्टव्यमित्यहमिति” यत्तु निषिद्धासम्बन्धएव सम्यक्त्वम् न तु विहितमात्रानुष्ठानमिति, तन्न यत्किञ्चिन्निषिद्धासम्बन्धस्याभावात्, सर्व्वनिषिद्धासम्बन्धस्य सर्व्वत्र सुलभत्वादिति सम्प्रदायः। अत्र ब्रूमः भगवदुद्देशेन कृतं किञ्चिदेव कर्म्म, सर्व्वं वा, काम्यं वा सर्व्वं, नित्यं वा सर्व्वमिति नाद्यः एकेनैव काम्येन नित्येन वा स्नानेन तथा कृतेन तत्फलसिद्धौ बहुवित्तादिसाध्ये श्राद्धादावप्रवृत्त्यापत्तेः नापरौ अशक्यत्वात् न तुर्य्यः जातेष्ट्यादेर्नित्यत्वाभावात् तस्मात् सम्यग्गृहस्थाश्रमपालनस्य न तत्फलं सम्यक्त्वञ्च सामस्त्यमेव अतो न श्राद्धादेः ब्रह्मलोकावाप्तिरिति साधूक्तं शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्ग इति तच्च फलं क्वचिद्विधिवाक्यश्रुतं क्वचिच्चार्थवादिकमिति”। इदन्त्ववधेयं कर्मध्वंसेनापूर्वप्रत्याख्याने “ज्ञानाग्निः सर्वकर्माणीत्यादि शास्त्रबोधितस्य तत्त्वज्ञाननाश्यत्वस्य बाधः ध्वंसस्य नाश्यत्वाभावात् न्यायमते तु कर्मपदेन तज्जन्यापूर्वलक्षणया तेषां क्षयसम्भव इति। अस्य च कार्य्यमात्रं प्रति कारणतेति नैयायिकादयः। कर्मण एव फलमिति मीमांसकाः। ईश्वराधिष्ठितादेव सूक्ष्मावस्थापन्नात् कर्मणः फलमिति वेदान्तिनः तथा हि ‘फलमत उपपत्तेरिति” शा० सू० भाष्ये “अथोच्येत कर्म्मकार्य्यादपूर्व्वात् फलमुत्पत्स्यते”इत्याशङ्क्य। तदपि नोपपद्यते अपूर्व्वस्याचेतनस्य काष्ठलोष्टसमस्य चेतनाप्रवर्त्तितस्य प्रवृत्त्यनुपपत्तेः तदस्तित्वे च प्रमाणाभावात् अर्थापत्तिः प्रमाणमिति चेन्न ईश्वरसिद्धेरर्थापत्तिपरिक्षयादिति” अपूर्व्वं निराकृत्य। “धर्म्मं जैमिनिरतएवेति” शा० सू०। जैमिनिमतं धर्म्मस्यैव फलहेतुत्वं पूर्व्वपक्षीकृत्य। “पूर्व्वन्तु वादरायणो हेतुव्यपदेशादिति” शा० सू० निराकृतम्। व्याख्यातञ्चैतत् भाष्यकृता शङ्कराचार्य्येण। नन्वनुक्षणविनाशिनः कर्म्मणः फलं नोपपद्यते इति परित्यक्तोऽयं पक्षः नैष दोषः श्रुतिप्रामाण्यात् श्रुतिश्चेत् प्रमाणं यथायं कर्म्मफलसम्बन्धः श्रुत एव उपपद्यते तथा कल्पयितव्यः न चानुत्पाद्य किमप्यपूर्व्वं कर्म्म विनश्यत् कालान्तरितं फलं दातुं शक्नोतीति अतः कर्मणो वा काचिदुत्तरावस्था फलस्य वा पूर्व्वावस्थाऽपूर्व्वं नामास्तीति च तर्क्यते। उपपद्यते चायमर्थ उक्तेन प्रकारेण ईश्वरस्तु फलं ददातीत्यनुपपन्नम्। अविचित्रस्य कारणस्य विचित्रकार्य्यानुपपत्तेः वैषम्यनैर्घृण्यप्रसङ्गादनुष्ठानवैयर्थ्यापत्तेश्च तथा च धर्मत एव फलमिति ‘पूर्व्वपक्षः”वादारायणस्तु आचार्य्यः पूर्व्वोक्तमेवेश्वरं फलहेतुं मन्यते केवलात् कर्म्मणोऽपूर्व्वाद्वा केवलात् फलमित्ययं पक्षः तुशब्देन व्यावर्त्त्यते कर्मापेक्षाद्वाऽपूर्व्वापेक्षाद्वा यथा तथा वा ईश्वरात् फलमिति सिद्धान्तः ‘हेतुव्यपदेशात्” धर्म्माधर्मयोरपि कारयितृत्वेनेश्वरोहेतुर्व्यपदिश्यते फलदातृतया च। “एष ह्येव साधु कर्म कारयति तं यमेभ्य उन्निनीषते एष उ एवासाधु कर्म कारयति तं यमधोनिनीषते” इति स्मर्य्यते चायमर्थो गीतासु। ‘यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्। स तया श्रद्धया युक्तस्तस्या